National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(66): 11-15
© 2026 NJHSR
www.sanskritarticle.com

**Snigdha Swarupa Barik**
Ph.D. Research scholar,
Utkal University, Vani Vihar,
Bhubaneswar, Odisha.

**Correspondence:**
**Snigdha Swarupa Barik**
Ph.D. Research scholar,
Utkal University, Vani Vihar,
Bhubaneswar, Odisha.

# प्रबोधमिश्रविरचिते प्रज्ञादूते जगत्स्वरूपविमर्शः

**Snigdha Swarupa Barik**

**DOI:** https://doi.org/10.5281/zenodo.20061706

**उपक्रमः -**

उत्कलीयदूतकाव्यपरम्परा भारतीयसाहित्ये एकं महत्त्वपूर्णं स्थानं प्राप्नोति। उत्कलदेशः प्राचीनभारतीयसंस्कृतेः एकं दिव्यपीठमस्ति । यत्र साहित्यं, दर्शनं, कला सङ्गीतं तथा योगविद्या सम्यक् समृद्धानि सन्ति। एतस्मिन्नेव ज्ञानसमृद्धप्रदेशे पण्डितः प्रबोधकुमारमिश्रः एकः प्रमुखः कविः भवति । सः "उत्कलस्य कालिदासः" इति कीर्त्यते। तस्य दूतकाव्यानि न केवलं साहित्यसौन्दर्यसम्पन्नानि अपितु गम्भीरदार्शनिकविषयकानि अपि सन्ति । अयं कविः स्वप्रतिभा वलेन नव संख्यकानि दूतकाव्यानि रचितानि । तेन विरचितानि दूतकाव्यानि उत्कलीयदूतकाव्य परम्परायाः उत्कर्षबिन्दुनि । तेषुप्रज्ञादूतः प्राधान्यमर्हति । काव्यस्यास्य सौष्ठवमतीव रुचिरमस्ति । कविः साधोर्मुखेन प्रज्ञाशारिकायाः पुरतः सर्वं वर्णयति, एतान् सन्देशान् सर्वेषां कृते श्रावयितुं च तस्यै निर्दिशति । अतः काव्यमिदं प्रज्ञादूतमिति नामधत्ते । काव्येऽस्मिन् कविः संसारस्य नश्वरतां, सांप्रतिकसमयस्य कुटीलतां, लोकानां दुराचारादिकं, मानवस्य कर्त्तव्यं, चिरन्तनसुखलाभस्योपायादिकं च वर्णयति एवं च प्रकृतिपुरुषः, शिवशक्तिः, धर्मः, आत्मा, प्रणवः, सृष्टितत्वम् (जगत्स्वरूपम्), ब्रह्म, मायाविषये वर्णयति । तस्य सर्वश्रेष्ठकृतित्वेन विवेचितं प्रज्ञादूते "ब्रह्मसत्यं जगन्मिथ्या" इति तत्त्वं प्रतिपादितं दृश्यते ।

कालिदासस्य मेघदूतवत् काव्यमिदमपि कश्चिदिति शब्दादारभ्यते । अस्य वर्णनानुसारेण कश्चिद् ब्रह्मलग्नः साधुरासीत् । एकदा स स्वप्रज्ञां सारिका भावेन संबोध्य तस्याः पुरतः निजमनोव्यथां प्रकाशितवान्। संसारः कथं दुःखपूर्णः, सर्वे नराः कथं न्यायपथाद्विच्युता भवन्ति, सर्वत्र कथं दुर्नितिर्व्याप्नोतीति विषयाः साधुना वर्णिताः । ब्रह्मणः नित्यत्वं, जीवपरमात्मनोः संबधादिकमपि काव्येऽस्मिन् वर्णितमस्ति। काव्यस्यान्तिमेषु दशश्लोकेषु कवेर्विस्तृतः परिचयस्तस्य काव्यकृतयश्च वर्णिताः सन्ति । एवं प्रकारेण काव्यं समाप्यते । कविः काव्यस्रष्टा । प्रजापतिः ब्रह्मैव सः काव्यसंसारस्य सृष्टिं करोति तथ्यैवं परिवर्त्तयति । अतः कथ्यते –

**"अपारेकाव्यसंसारेकविरेवप्रजापतिः।**
**यथास्मैरोचतेविश्वंतथेदंपरिवर्तते ।।"[१]**

संस्कृतकाव्यानि मुख्यतः भागत्रयेण विभक्तानि सन्ति । तद्यथा गद्यं, पद्यं, मिश्रश्चेति । पद्यकाव्यं पुनश्च भागद्वयेन विभक्तम् । तद्यथा महाकाव्यं खण्डकाव्यश्चेति । महाकाव्यानां कृते आलंकारिकैः विस्तृतं वर्णनात्मकं च लक्षणं प्रदत्तम् । "खण्डकाव्यं भवेत् काव्यस्येकादेशानुसारी च ।"[२] संस्कृतस्य दूतकाव्यानि खंडकाव्यानामन्तर्गतानि एव । एतानि खंडकाव्यानि अपि गीतिकाव्यं नाम्ना अभिधीयन्ते ।

**१. जगत्स्वरूपम् -**

नामरूपात्मकजगतः सृष्टिः ईश्वरस्य अव्यक्तस्वरूपात् न तु व्यक्तस्वरूपात् भवति । जगतः उपादानं तथा च निमित्तं कारणं भवति परमात्मा । स्थावरजङ्गमादिसकलभूतानि तस्मात् उत्पद्यन्ते। सः

अधिष्ठातारूपेण अस्य जगतः निर्माणं परिपालनं संहारं च करोति। जगदिदं तस्यैव सनातनांशः । अज्ञानस्य विक्षेपशक्तिद्वारा अस्यक्षण भङ्गुरसंसारस्य निर्माणं भवति । अत्र अज्ञानं नाम अविद्या, माया, अवस्तु वा । ब्रह्म वस्तु इति उच्यते । तद्भिन्नं सकलपदार्थं भवति अवस्तुः इति। इयं सृष्टिः विचित्रा इति कविः कथयति । यथा:-

**"हे स्नेहाद्रे ! शृणु वचनकं सृष्टिरेषा विचित्रा ।"**[३]

सृष्टिः भवति परिवर्त्तनशीलाः। पण्डिताः इयं सृष्टिं सारसृष्टिं इति वदन्ति। परन्तु विचार दृष्ट्या इदं सकलं नश्वरं भंगुरं च । अतः कथ्यते -

**"शृणु प्रिये ! सारि ! गिरं मनोरमां**
**संसारसृष्टिश्च मुदा वुधेरिता ।**
**विचारभङ्ग्या सकलं च नश्वरं (भङ्गुरं)**
**तथा च तारा– रवि– चन्द्र– देवताः।।"**[४]

संसारस्य असारता एव महत् सत्यमस्ति । तथैव जीवनं फेनाभ इव । इदमपि निष्ठुर सत्यम् । यथा -

**"महत्तु सत्यं जगतः व्यलीकता**
**तथा च फेनाभ निभं सुजीवनम् ।।"**[५]

प्रकृतिपुरुषसंयोगात् सृष्टिर्भवति, प्रकृतेर्जनत्वात् न तस्याः एवसका-शात्संसारो जायते न च पुरुषस्य निष्क्रियत्वात् तस्मादेव । सृष्टिकृते द्वयोरपि संयोगऽपेक्षते । चेतनाविष्ठातृणायमेव जडप्रकृतिः सृष्टिकार्यं कर्त्तुं शक्नोति। प्रकृतिपुरूषयोः संयोगे कारणं किमित्यत्राह सांख्यकारिकायाम् -

**"पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।**
**पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ।।"**[६]

अस्मिन् दूतकाव्ये कविः कथयति - हेसारिके ! त्वम् अस्मिन् सृष्टिः प्रकृतिपुरुषयोः प्रक्रियाविषये सम्यक् जिज्ञासति । परन्तु धातुः वीणावादने चतुका मानवाः एतत् विस्मरन्ति । पुनः कोऽपि प्रकृतिपुरुषयोः वास्तवतायाः उपलब्धिम् अपि न कुर्वन्ति एवं स्थिरचित्ते ब्रह्मास्वादनं कर्त्तुं न वाञ्छति ।

**"ब्रह्माऽऽस्वादं स्थिरतरहृदा नेच्छतीह प्रमाणम् ।**
**लोभ्यं भव्यं प्रकृतिपुरुषं नो स्मरेत् कः कदाऽपि ।।"** [७]

चौर दृष्ट्यां इदं संसारं प्रवञ्चनापूर्णमस्ति । कविदृष्ट्यां इदमानन्दकरं तथा भक्तिदृष्ट्या इदं ब्रह्ममयं तथा प्रेमिकदृष्ट्या इदं प्रेममयं भवतः। परन्तु मोक्षग्रस्तः गृही ममतया आवद्धः सन् इदं संसारं ममेति उच्यते। यथा -

**"सृष्टेरर्थः भवति नियतं बंचनं चौर-दृष्ट्या ।**
**आनन्दान्तः कथयति कविः ब्रह्मधृक् भक्तिभुक्तः**
**प्रेमात्क्तो वा वदति सततं लुब्धकः प्रेमदिग्धः**
**गेही मोही सकलमितिमे मोहितः भाषते वा ।।"**[८]

शैवदर्शने शिव-शक्ति-संयोगः समग्रसृष्टेः मूलकारणं मन्यते उक्तञ्च -

**"शिवशक्तिसंयोगाज्जायते सृष्टिकल्पना ।"**

परमकारुणिकः शिवः क्रीडा एवं च लीलाक्रमेण स्वस्य शक्त्या सृष्टिसर्जनं करोति । शक्त्या सह शिवः युक्तमिति सर्वत्र प्रसिद्धमस्ति। अनयोः मिलनेन सृष्टिप्रक्रिया प्रारम्भं, परिपालनञ्च भवति । अतः कविना प्रोक्तम् -

**"शक्त्या शर्वः युत इति कथा सर्वमान्या प्रसिद्धा ।**
**युग्माश्लेषात् प्रभवति तथा सृष्टिरेव विचित्रा ।।"**[९]

कविः प्रज्ञादूते दर्शयति यत् ममैव सर्वम् ईदृशं चिन्तनं मनः दूषयति । तथा च अहं भावना मोक्षप्राप्तये वाधासृष्टिं करोति । उच्यते यत् -

**"ममेति चिन्ता मतिघातिनी चिरम् ।"**[१०]

आचार्यशंकरः मोहमुद्गरमाध्यमेन मोहविनाशाय मानवोद्धारार्थं सरलमुपायं वर्णितवान्। तस्य काव्यस्य अनुशीलनम् अस्मिन् दूतकाव्ये कृतम् । यथा -

**"का वा कान्ता क इह तनयः कस्य वाकोऽत्र बन्धुः ।**
**स्वार्थाचार-प्रभव-सविता सर्वतः व्यक्तकान्तिः ।**
**यावत् शक्तिः स्वकृति विषये रक्तिरेवं खिलस्य**
**पश्चाद्वृद्धः बल- गति- हतः कोऽपि पृच्छेन्न गेहे ।।"**[११]

अर्थात् का कस्य कान्ता, कः कस्य तनयः एवं कोऽत्र बन्धुः। स्वार्थाचरणात् प्रभवः सविता सर्वत्रः व्यापितः भवति। यावत् स्वकृति विषये शक्तिः अस्ति । तावत् सर्वेषाम् अनुरक्तिः अस्ति। तत्पश्चात् यदा बृद्धः भविष्यति, तदा कोऽपि कस्मै न पृच्छति ।
पुनश्च -

**"जाया च काया च सुकान्ति-कोमला**
**छाया च माया च मरीचिकोपमा ।**
**विचारयेत् नो पथिकः व्यथातुरः**
**खिलं निजस्येति विभाव्य रोदिति ।।"**[१२]

अर्थात् सुकान्ति कोमला जाया, काया, छाया एवं च माया इयं सर्वा मरीचिका इव । पथिकः इदं न विचारयित्वा इदं सर्वं निजस्येति मत्वा रोदिति ।
विशालधाम्नि प्रतिभा प्रभाकरस्य किरणेन दीप्तः सन् इदं नरः सकलं "ममेति ममेति", "निजस्येति" विचारयेत् । उक्तञ्च -

**"विशालधाम्नि प्रतिभा– प्रभाकरः**
**खिलं निजस्येति विचारयेत् मुधाः ।।"**[१३]
**"मायामोहादिभिरनुदिनं पीडिताः नष्टनीडाः ।**
**सर्वं तावत् मम" इति मुधा वीरतां द्योतयन्ति ।।"**[१४]

विवर्त्तनात् अस्य विश्वस्य नाशं भविष्यति एवं भस्मावशेषात् पुनः नूतनसृष्टिः जायते । अतः श्रीमिश्रेणोच्यते -

**"विश्वस्य नाशो भविता विवर्त्तनात् ।**
**भस्मावशेषात् नव-सृष्टिरूज्वला ।"**[१५]

**ब्रह्मसत्यम् -**

यद् वस्तु शाश्वतिकं परिवर्तनरहितं अविनश्वरं च तत् सत्यम्, अतोऽन्यद् असत्यं मिथ्या वा। एवं चिन्तनेन सिध्यति यद् जगद् असत्यं जगतः परिवर्तनशशीलत्वात्। ब्रह्म च सत्यं शाश्वतिकं अपरिवर्तनशीलम् । अतः तस्य सत्यता न केनापि रूपेणाक्षेमुं शक्या। वेदान्तदर्शने ब्रह्म निर्विकल्पं निरुपाधिनिर्विकारं चेति उररीक्रियते।

तद् ब्रह्म द्विविधं निर्गुणं सगुणं च। निर्गुणं ब्रह्म परमार्थदृष्ट्या सच्चिदानन्दस्वरूपम् । तदेव जगतः प्रकाशकमस्ति । आत्मा एव ब्रह्म अस्ति । जगतः सर्वे जीवाः तु ब्रह्मैव सन्ति । अज्ञानवशात् ते पृथग्रूपाः दृश्यन्ते। प्रलयकालेऽपि यदा सर्वं जगद् विनश्यति ब्रह्म पूर्ववत् तिष्ठति। जगतः सर्वस्वं ब्रह्मैव स्वीकरोति, तदेव जगतः चराचरस्य उपादानकारणं निमित्तकारणश्चास्ति। एतदेव परमात्मारूपेण विश्वस्य अखिलस्य मूले तिष्ठति । सम्पूर्णऽयं लोको ब्रह्मणः एव विवर्तः विद्यते । सः एकोऽद्वितियश्च अस्ति । यथा -

**"ब्रह्माऽऽस्वादं स्थिरतरहृदा नेच्छतीह प्रमाणम् ।।"**[१६]

इयं सृष्टौ कीटादारभ्यः ब्रह्मणः यावत् यानि सर्वाणि द्रव्याणि सन्त्येव सर्वं ब्रह्ममयम् । सर्वेषां हृदये तत् सच्चिदान्दरूपेण विद्यमानं भवति । कोऽपि नीचः अथवा उचः नास्ति। तस्य अदृश्य शक्तिः सर्वत्र अनुभूयते । अतः मिश्रेणोच्यते -

**"कीटाद्ब्रह्मप्रभवतिसदाऽदृश्यशक्ति- प्रलिढम् ।**
**सर्वेषां वै हृदय- कमले सच्चिदानन्द- कान्तिः ।**
**को वा नीचः क इह च महान् नैवभाति प्रमाणम् ।**
**मोहाक्रान्ताऽयन- वचनके वोच्च- नीच- प्रवाहः।।"**[१७]

ये जनाः कदापि सत्मार्गं न त्यजन्ति, ते आनन्देन ब्रह्मम् आश्रयन्ति। यथा -

**"त्यजन्ति नो सत्यपथं चिरन्तनं**
**भजन्ति वै ब्रह्म- पदं मुदाऽऽतुराः।।"**[१८]

ब्रह्मात्मना मनयोगं हि चिरन्तनं शाश्वतं च । ब्रह्मधाम्नि आत्मना सह आत्मा संयुज्यते । परन्तु सृष्ट्यां मनुष्यः भेदमूलकं वार्तालापं करोति। अपि च विश्वपितुः ब्रह्मास्वादनम् अतीव सुखदायकं तथा जीवान् हसयति । यथा -

**"आत्मन्यात्मा मिलति मधुरं ब्रह्मधाम्नि प्रकामम् ।**
**सृष्टौ लोकः कथयति कथां भेद-भाबात्मिका वा ।**
**सर्वत्रैवं सरति निरतं विश्वपातुः प्रलीढः ।**
**ब्रह्माऽऽस्वादः परम- सुखदः प्राणिनां प्राणहासी ।।"**[१९]

ब्रह्मस्वादने मोक्षलाभं भवति । यथा -

**"ब्रह्मास्वादैः भजतु परमं मोक्षकं लक्ष- लाभी ।।"**[२०]

मेधा शक्त्याः मनुष्यः ब्रह्ममयेन तेजसा उज्ज्वलितं भविष्यति । मनुष्यः सत्यमयं भूत्वा ब्रह्मामृतं पास्यति । यथा -

**"जनप्रवाहः मिलितः प्रमेधसा भविष्यन्ति ब्रह्ममयेन तेजसा ।"**[२१]

ब्रह्मास्वादैः हि महाकालः सुखी भवति । यथा -

**"ब्रह्मास्वादै भवति सुखितः काल एवं प्रमाणम् ।।"**[२२]

### १.२ जगन्मिथ्या -

वेदान्तानुसारं जगत् नितान्तासत्यपदार्थमस्ति। जीवः अज्ञानेन मिथ्याजगत् मन्यते । एष ब्रह्म आत्मा वा यदा मलिनसत्वोपाधियुतो भवति तदा ईश्वरः इति संज्ञा लभते । परं यदा मलिनसत्वोपाधियुक्तो भवति तदा जीवः कथ्यते ।

एकमेव ब्रह्म मायया अनेकानि रूपाणि धारयति । मायैव अविद्या-अज्ञान-अध्यारोप-विवर्तादिशब्दैः व्यवह्रियते । वेदान्ते त्रिविधा सत्ता स्वीक्रियते- १.प्रातिभासिकी, २. व्यावहारिकी, ३. पारमार्थिकी सत्ता। वेदान्तानुसारं तात्विक दृष्टैव जगन्मिथ्येति, व्यवहारदृष्ट्या तु तदनुभूति न निर्मूला । एकस्यैव तत्वस्य समष्टि- व्यष्टिरूपेण नामान्तरं ब्रह्मजीवात्मानौ इति। ब्रह्म साक्षातकारे द्वयोरेक्यस्यानुभूतेः 'तत्वमसि' इति सङ्गच्छते। इदं कथनं सुष्ठु एवास्ति यत् इदं सम्पूर्णं जगत् ब्रह्मैवास्ति । तद्व्यतिरिक्तं तु असत्यम् ।

ब्रह्मास्वादैः समग्र धरणी तत्वतथ्यावतिर्णा भवति । ब्रह्म एव सत्यं, जगन्मिथ्या प्रचारं कुर्वन्ति । प्रोक्तं च -

**"ब्रह्मा आस्वादैः भवति धरणी तत्त्व-तथ्यावतिर्ण्णा ।।"**[२३]

**"सत्यं ब्रह्माऽखिल-जगदिदं छन्नमेवं मृषा वै ।।"**[२४]

### १.३ माया -

वेदान्तदर्शने माया संज्ञकमेकं तत्वं वर्णितमस्ति । आचार्यशङ्करो ब्रूते यत्माया भगवतो ब्रह्मणोऽव्यक्तशक्तिरस्ति । सा माया त्रिगुणा अविद्या रूपिणी च । न तदीय आदिर्ज्ञायते । अविद्या (माया) सत्यमावृणोति असत्यश्च वितनोति । यदैव ज्ञानज्योतिः प्रादुर्भवति। तदैव तद् अज्ञानं (अविद्यामाया) तिरोहितं जायते । आचार्यशंकरः अविद्या- अज्ञान-माया पदानि एकस्मिन्नेवार्थे प्रयुयोजः, परं परवर्तिनो वेदान्तिनः तत्र भेदं दर्शयन्तः प्राप्यन्ते । माया शुद्धसत्वप्रधानास्ति । अविद्यास्ति मलिनसत्वप्रधाना । माया ईश्वरस्योपाधिरस्ति जीवस्य च अविद्या । सानन्दो 'माया' समष्टिगतज्ञानं किञ्च अविद्यां व्यष्टिगतमज्ञानमिति नाम्ना व्यवहरति । माया इत्युक्ते आचार्यशंकरः परमेश्वरस्य शक्तिम् एवमानन्ति । इयं मायया समग्रजगतः सृष्टिं भवति । प्रज्ञादूते कविः वर्णयति यद् सर्वेऽपि मानवाः मायादियुक्ताः कलुषिताश्च भुत्वा पापपरिपूर्णाः सन्तः अपौरुषत्वं पौरुषत्वमिति विचारयति ।

**"एतद् विचित्रं यदहो जनोऽखिलः**
**मायादियुक्तः कलुषातिलोलितः**
**काले कलङ्कैः कलयत्यपौरुषं**
**केलि-स्फुटं पौरुषमेव भाव्यते ।।"**[२५]

ममेति ममेति मुहुर्मुहुः उक्त्वा पुनः पुनः मदान्धः मानवः मोहरूपी महान्धकारेण ज्वरग्रस्तः । अन्तिमावस्था समुपस्तितेऽपि सः लोभं त्यजयितुं नैव शक्नोति ।

**"ममेतिवाचं कथयन्मुहुर्मुहुः।**
**मदालसः मोह-महान्धसा ज्वरी,**
**महाप्रयाणायन-यात-तत्परः**
**तथापि लोभं त्यजतीह नो पुनः ।।"**[२६]

आचार्यशंकरस्य मते एकः, अद्वितीय निर्गुण ब्रह्म एव परमतत्वम्। परन्तु इदं निर्गुण ब्रह्मः मयोपाधिको भूत्वा सगुणः साकारः च भवति। इदं सगुणब्रह्म एव ईश्वरः नाम्ना कथितम् । ईश्वरः सर्वज्ञः एवं सर्व शक्तिमान् भवति । ईश्वरः जगतस्य स्रष्टा । माया दृष्ट्वा अविचरयन्

जीवः मायया अधीनः परन्तु माया इश्वराधीनः भवति । सगुणब्रह्म तथा ईश्वर उपसनया चित्तशुद्धिः भवति एवं ब्रह्मज्ञानं प्रति पथ उन्मुक्तं भवति । अतः सुप्रसिद्धः रचयिता स्वामी विद्यारण्यः माधवाचार्यः प्रतिपादयति -

**“सत्वं शुद्ध्य विशुद्धिभ्यां मायाऽविद्ये च ते मते**

**मायाविम्बो वशीकृत्य तां स्यात् सर्वज्ञईश्वरः ।।”**२७

इदं संसारं मायामयमिति विचार्यं तत्त्वार्थपूर्णकार्यं करणाय कविः उपदिशति अत्र यथा -

**"मायामयं विश्वमिमं विचारयन्**

**तत्त्वार्थसंकासकृतं कुरुष्ववै।।"**२८

शरीरं भवति नित्यजन्ममरणशीलमिति । यतः इह संसारे सूर्यस्य उदयास्तमिव यः जायते सः मरणमवश्यं प्राप्नोति । यः म्रियते तस्य जन्म सुनिश्चितमेव । अतः कोऽपि संसारागतः जनः जन्ममृत्युचक्रं विहातुं न समर्थः । संसारस्य प्रत्येकं वस्तु प्रतिक्षणं विवर्त्तते । एकं रूपं विहाय अपरं धारयामि ।

**“जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च**

**तस्मादपरिहार्येऽर्थे न त्वम् शोचितुमहर्षि ।।”**२९

कर्त्तव्याकर्त्तव्ययोः अवधारणरूपो शास्त्रं धर्म इति कथ्यते। जगन्मूलत्वेन संस्कृतनियामकानि तत्त्वानि धर्माः । अस्मिन्काव्ये कविः वर्णयति प्रयाणकाले धर्म एवसुहृद् भवति । यथा -

**"प्रयाणकाले सुहृदेव धर्मकः।।"**३०

अस्मिन् दूतकाव्ये कविः दूतरूपीप्रज्ञां अर्थात् वेदोज्वलाबुद्धिं सृष्टेः धर्मरक्षार्थं प्रेरयति ।

**उपसंहारः: -**

प्रज्ञादूतस्य विषयवस्तुनः ज्ञायते यत् काव्यमिदं दूतकाव्य-परम्परायामेका सफलप्रचेष्टा। काव्यमिदं दार्शनिकतत्वानामुपरि विरचितमस्ति। काव्यकारः पण्डितः प्रबोधकुमारमिश्रः निर्विवादेन प्रतिभावान् कविः । काव्यरचना क्षेत्रे तस्यासाधारणं नैपुण्यं विद्यते । काव्यं भवति संसारस्य प्रतिफलनम्। अत्र कवेर्वर्णनमतीवहृद्यं भावगम्भीरं चास्ति । प्राणिनः जन्मधूलेरेव सम्भवति । मृत्योरनन्तरं सोऽपि धूलौ प्रलीयते । अतः केवलं ब्रह्मणि एव मनोनिवेशः करणीय इति कविः कथयति । शरीरमिदं भस्मसात् भविष्यति । मृत्युना सहाभिलाषोऽपि समाप्ति यास्यति । तथाप्याशा सर्वदा तरुणायते इति सूचयति कविरत्र । कविः स्पष्टयति यत्संसारः स्वार्थपरायणः अस्ति । यावत् कस्यचित्वलं, धनं, मानं वा अस्ति, तावत् जनाः तस्य समीपे अनुरक्ताः भवन्ति। किन्तु वृद्धावस्थायां शक्तिक्षये च कोऽपितं न पृच्छति । अतः कविः मनुष्यं संसारासक्तेः विमुक्त्यर्थम् आत्मज्ञानाय प्रेरयति । आसक्तिः, मोहः तथा स्वार्थभावना दुःखस्य कारणं भवति इति गीतादिशास्त्राणां दृष्टान्तमुद्धृत्य कविः प्रकाशयति। संसारबन्धनं केवलं विचारशुद्ध्या तथा आत्मज्ञानस्य प्रकाशेन नष्टं भवति । कविः पुनश्च स्पष्टं प्रतिपादयति यत् संसारस्य वस्तूनि यथा जाया, काया, छाया, माया च अनित्याः, अस्थिराः, मरीचिकासदृशाः च सन्ति । एते सर्वे दुःखजनकाः, मिथ्या तथा बन्धनस्य कारणानि भवन्ति । तस्मात् आत्मस्वरूपं ज्ञात्वा पथिकः यदि ज्ञानेन, विवेकबुद्ध्या संसारस्य असारत्वं विचारयेत् तर्हि संसारबन्धनात् दुःखात्मुक्तिः सम्भवति । कविः कथयति मनुष्यः यावत् अस्य संसारस्य ज्ञानं न लभते, तावत् 'ममेति' तथा 'निजस्येति' इत्येतैः मोहबन्धनैः पीडितः भवति ।

इयं सृष्टिः सौन्दर्यमयी प्रतीतिः भवति । सूर्यः, चन्द्रः, तारा, पर्वताः, नद्योः वा सर्वे सौन्दर्यं प्रकटयन्ति । परन्तु सृष्टिः निरन्तरं परिवर्त्तनशीला अस्ति । यः स्थिरं प्रतीयते, सोऽपिकालक्रमेण नष्टं भवति । उदाहरणतः सूर्यः, चन्द्रः तथा तारा अपि अनित्याः । अतः पण्डिताः सृष्टेः सौन्दर्यं पश्यन्ति यं तत्त्वज्ञाः तस्य नश्वरताम् अनुभवन्ति । सृष्टेः प्रत्येकं वस्तुक्षणभङ्गुरं भवति । अतः मनुष्यः यदा अनित्यत्वम् अनुभवति, तदा सः भौतिकसुखेषु आसक्तिः त्यजति तथा सन्मार्गे चलति । जगत्यद्यपि वाह्यतः सत्यं प्रतीतं भवति, तथापि वस्तुतः असत्यम् । संसारस्य प्रत्येकवस्तु भौतिकसुखं धनप्रसिद्धिरादि नाशवान् अस्ति । जीवनं फेनाभं यथा फेनः क्षणेन नष्टं भवति, तथैव जीवनमपि । संसारस्य वास्तविकस्वरूपविषये अस्मिन् शोधप्रबन्धे प्रतिपाद्यते यत् संसारः परिवर्त्तनशीलः, अनित्यः च । अनेन जनानां चेतना जागरणं भविष्यतीति आशास्यते ।

**टीप्पणी -**

१. ध्व.लो.,१.३
२. सा.द., ६.३२९
३. प्रज्ञा. दू., ३०
४. तत्रैव, १५
५. तत्रैव, १००
६. सांख्य.का., २१
७. प्रज्ञा. दू., २६
८. तत्रैव,५९
९. तत्रैव,५८
१०. तत्रैव,३३
११. तत्रैव, ५
१२. तत्रैव, ५१
१३. तत्रैव, १६
१४. तत्रैव,६
१५. तत्रैव, ८८
१६. तत्रैव, २६
१७. तत्रैव, २९
१८. तत्रैव, ४३
१९. तत्रैव, ५६
२०. तत्रैव, ५८

२१. तत्रैव, ७८

२२. तत्रैव, ६६

२३. तत्रैव, ६३

२४. तत्रैव, ६४

२५. तत्रैव, ३७

२६. तत्रैव, १२

२७. पञ्चदशी.१.१६

२८. प्रज्ञा दू- ९३

२९. श्रीमद्. गी -२/२७

३०. प्रज्ञादू- ८९

**सहायकग्रन्थसूची -**


1.Mishra Prabodh Kumar, “प्रज्ञादूतम्” Orissa Book Store Binod Bihari, Cuttack,1994.

2.Thakur Krushna mohan, Das Jay Krishna, Gupta Haridas, साहित्यदर्पणः, Chaukhamba Sanskrit Series Office, Vanaras,1947.

3.Mishra Shobhit, Das Krishna, Haridas Gupta, ध्वन्यालोकः Chaukhamba Sanskrit Series Office Vanaras,1953.

4.Mani Ravikanta, सांख्यकारिका, Hansa Publication, Jaypur, 2018.

5.Mishra Lambodar, वेदान्तसारः, Rashtriya Sanskrit Sahitya Kendra Saraswati Sadan, Jaypur,2018.

6.Shastri Jagadish, ब्रह्मसूत्रशांकरभाष्य, Motilal Banarasi Das, Delhi,1980.

7.Das Harekrishna, श्रीमद्भागवद्गीता(शांकरभाष्य), Goyandka, Gitapress, Gorakhpur.

8.Mishra Prabodha Kumar, प्रबोधकुमार-दूतकाव्यग्रन्थावली, Basanta Publications, Dagarpada, Cuttack, 2008.

9.Maxmuller. F, ऋग्वेदसंहिता (द्वितीयभागः), Chaukhamba Sanskrit Series Office, Varanasi, 1966.

10.Swami Prabhupada, श्रीमद्भागवतम्, Bhakti Vedanta Book Trust Harekrushna Dham, Bombay, 1997.

11.Mishra Shree Shobhit, Das Jayakrishna, Haridas Gupta, ध्वन्यालोकः, Chaukhamba Sanskrit Series Office, Varanasi, 1953.

12.Mishra Lambodar, वेदान्तसार, राष्ट्रीयसंस्कृतसाहित्यकेन्द्र-सरस्वतीसदन, जयपुर, 2018.